# 12. वाडमनःप्राणस्वरूपम्

---

## अभ्यासः

### प्रश्नः 1. एकपदेन उत्तरं लिखित

(क) अन्नस्य कीदृशः भागः मनः?
(ख) मथ्यमानस्य दनः अणिष्ठः भागः किं भवति?
(ग) मनः कीदृशं भवति?
(घ) तेजोमयी का भवति?
(ङ) पाठेऽस्मिन् आरुणिः कम् उपदिशति?
(च) "वत्स! चिरञ्जीव" इति कः वदति?
(छ) अयं पाठः कस्मात् उपनिषदः संगृहीतः?

**उत्तरः**
(क) अणिष्ठः/ लघुतमः
(ख) सर्पिः/घृतम्
(ग) अन्नमयम्
(घ) वाक्/वाणी
(ङ) श्वेतकेतुम्/स्वपुत्रम्
(च) आरुणिः
(छ) छान्दोग्यात्

### प्रश्नः 2. अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत
(क) श्वेतकेतुः सर्वप्रथमम् आरुणिं कस्य स्वरूपस्य विषये पृच्छति?
(ख) आरुणिः प्राणस्वरूपं कथं निरूपयति?
(ग) मानवानां चेतांसि कीदृशानि भवन्ति?
(घ) सर्पिः किं भवति?
(ङ) आरुणेः मतानुसारं मनः कीदृशं भवति?

**उत्तरः**
(क) श्वेतकेतुः सर्वप्रथमम् आरुणिं मनसः स्वरूपस्य विषये पृच्छति।
(ख) आरुणिः प्राणस्वरूपं इत्थम् निरूपयति यत पीतानाम् अपां यः अणिष्ठः सः प्राणः भवति।
(ग) यादृशम् अन्नादिकं मानवाः गृह्णन्ति तादृशानि एव मानवानाम् चेतांसि भवन्ति।
(घ) मथ्यमानस्य दनः यो अणिमा ऊर्ध्वं समुदीषति तत् सर्पिः भवति।
(ङ) आरुणेः मतानुसारं अशितस्य अन्नस्य यः अणिष्ठः तत् एव मनः भवति।

**प्रश्नः 3. (अ) 'अ' स्तम्भस्य पदानि 'ब' स्तम्भेन दत्तैः पदैः सह यथायोग्यं योजयत**
अ — ब
मनः — अन्नमयम्
प्राणः — तेजोमयी
वाक् — आपोमयः

**उत्तर:**
अ — ब
मनः — अन्नमयम्
प्राणः — आपोमयः
वाक् — तेजोमयी

**(आ) अधोलिखितानां पदानां विलोमपदं पाठात् चित्वा लिखत**
पदानि — विलोम पदानि
(क) गरिष्ठः — .............
(ख) अधः — .............
(ग) एकवारम् — .............
(घ) अनवधीतम् — .............
(ङ) किञ्चित् — .............

**उत्तर:**
पदानि — विलोम पदानि
(क) गरिष्ठः — अणिष्ठः
(ख) अधः — ऊर्ध्वम्
(ग) एकवारम् — भूयो
(घ) अनवधीतम् — अवधीतम्
(ङ) किञ्चित् — सर्वं

**प्रश्नः 4. उदाहरणमनुसृत्य निम्नलिखितेषु क्रियापदेषु 'तुमुन्' प्रत्ययं योजयित्वा पदनिर्माणं कुरुत**
यथा-प्रच्छ् + तुमुन् — प्रष्टुम्

**उत्तर:**
(क) श्रु + तुमुन् – श्रोतुम्
(ख) वन्द् + तुमुन्
(ग) पठ् + तुमुन् पठितुम्
(घ) कृ + तुमुन्

(ङ) वि + ज्ञा + तुमुन् विज्ञातुम्
(च) वि + आ + ख्या + तुमुन्

**प्रश्नः 5. निर्देशानुसारं रिक्तस्थानानि पूरयत**
(क) अहं किञ्चित् प्रष्टुम् ............। (इच्छ् – लट्लकारे)
(ख) मनः अन्नमयं ............। (भू – लट्लकारे)
(ग) सावधानं ........। (श्रु – लोट्लकारे)
(घ) तेजस्वि नौ अधीतम् ........। (अस् – लोट्लकारे)
(ङ) श्वेतकेतुः आरुणेः शिष्यः ........। (अस् – लङ्लकारे)

**उत्तर:**
(क) अहं किञ्चित् प्रष्टुम् इच्छामि।
(ख) मनः अन्नमयं भवति।
(ग) सावधानं शृणु।
(घ) तेजस्वि नौ अधीतम् अस्तु।
(ङ) श्वेतकेतुः आरुणेः शिष्यः आसीत्।

**(अ) उदाहरणमनुसृत्य वाक्यानि रचयत**
यथा-अहं स्वदेशं सेवितुम् इच्छामि।
(क) ............. उपदिशामि।
(ख) ....................... प्रणमामि।
(ग) .................. आज्ञापयामि।
(घ) .......... पृच्छामि।
(ङ) .......... अवगच्छामि।

**उत्तर:**
(क) अहम् गीतायाः सन्देशम् उपदिशामि।
(ख) अहम् प्रातः पितरम् प्रणमामि।
(ग) अहम् स्वपुत्रम् गन्तुम् आज्ञापयामि।
(घ) अहम् गुरुम् प्रश्नम् पृच्छामि।
(ङ) अहम् अधुना सम्यक् अवगच्छामि।

**प्रश्न 6. (अ) सन्धि कुरुत**
(क) अशितस्य + अन्नस्य = ............
(ख) इति + अपि + अवधार्यम् = ............
(ग) का + इयम् = ............
(घ) नौ + अधीतम् = ............

(ङ) भवति + इति = ............

**उत्तर:**
(क) अशितस्य + अन्नस्य =  अशितस्यान्नस्य
(ख) इति + अपि + अवधार्यम् = इत्यप्यवधार्यम्
(ग) का + इयम् =  केयम्
(घ) नौ + अधीतम् =  नावधीतम्
(ङ) भवति + इति = भवतीति

**(आ) स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत**
(क) मथ्यमानस्य दधनः अणिमा ऊर्ध्वं समुदीषति।
(ख) भवता घृतोत्पत्तिरहस्यं व्याख्यातम्।
(ग) आरुणिम् उपगम्य श्वेतकेतुः अभिवादयति।
(घ) श्वेतकेतुः वाग्विषये पृच्छति।

**उत्तर:**
(क) कीदृशस्य दनः अणिमा ऊर्ध्वं समुदीषति?
(ख) केन घृतोत्पत्तिरहस्यं व्याख्यातम्?
(ग) आरुणिम् उपगम्य कः अभिवादयति?
(घ) श्वेतकेतुः किम् पृच्छति?

**प्रश्नः 7. पाठस्य सारांशं पञ्चवाक्यैः लिखत**

**उत्तर:**
पाठस्य सारांशः
(i) महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्।
(ii) श्वेतकेतुः स्वपितरम् वाक्मनप्राणादीनाम् विषये अपृच्छत्।
(iii) आरुणिः अवदत् यत् अशितस्य तेजसा यः अणिष्ठः सा वाक् भवति।
(iv) अशितस्य अन्नस्य यः लघुत्तमः तत् मनः भवति।
(v) पीयमानानाम् अपां यः अणिमा ऊर्ध्वः समुदीषति सः एव प्राणः भवति।